| | |
|---|---|
| फलं यदुक्तं तदशेषमेव विनाश्य | phalaṃ yaduktaṃ tadaśeṣameva vināśya |
| पश्चात्स्वदिशं नयेताम् ॥३९॥ | paścātsvadiśaṃ nayetām ||39|| |
| ताराग्रहश्चेत्क्षितिजात्रिकोणे सूर्यादपि स्याद्यदि वा शशांकः । | tārāgrahaścetkṣitijāttrikoṇe sūryādapi syādyadi vā śaśāṃkaḥ | |
| दिगीश्वरात्पंचमगो बली वा ग्रहः | digīśvarātpaṃcamago balī vā grahaḥ |
| स्वकाष्ठां नयति प्रसह्य ॥४०॥ | svakāṣṭhāṃ nayati prasahya ||40|| |
| दृष्टाऽदृष्टफलाप्त्यै शास्त्रं हृदये निधाय मिहिरस्य । | dṛṣṭā:'dṛṣṭaphalāptyai śāstraṃ hṛdaye nidhāya mihirasya | |
| दैवज्ञवल्लभाख्यं दृष्ट्वा प्रश्नं वदेत्तज्ज्ञः ॥४१॥ | daivajñavallabhākhyaṃ dṛṣṭvā praśnaṃ vadettajjñaḥ ||41|| |
| यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पंक्तिम् । | yadupacitamanyajanmani śubhā:'śubhaṃ tasya karmaṇaḥ paṃktim | |
| व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥४२॥ | vyañjayati śāstrametat tamasi dravyāṇi dīpa iva ||42|| |
| आदित्यदासतनयस्तदवाप्तबोधः | ādityadāsatanayastadavāptabodhaḥ |
| कापित्थलः सवितृलब्धवरप्रसादः । | kāpitthalaḥ savitṛlabdhavaraprasādaḥ | |
| आवन्तिको मुनिमतान्यवलोक्य यत्नादेतां | āvantiko munimatānyavalokya yatnādetāṃ |
| वराहमिहिरो रचयांचकार ॥४३॥ | varāhamihiro racayāṃcakāra ||43|| |
| ॥श्रीँ॥ | || śrīm̐|| |

https://www.culturavedica.org/